# श्री ललिता पंचरत्नं

प्रातः स्मरामि ललितावदनारविंदं
बिंबाधरं पृथुलमौक्तिक शोभिनासम् ।
आकर्णदीर्घनयनं मणिकुंडलाढ्यं
मंदस्मितं मृगमदोज्ज्वल फालदेशम् ॥ 1

प्रातर्भजामि ललिताभुजकल्पवल्लीं
रक्तांगुलीयलसदंगुलिपल्लवाढ्याम् ।
माणिक्यहेमवलयांगदशोभमानां
पुंड्रेक्षुचापकुसुमेषुसृणीर्दधानाम् ॥ 2

प्रातर्नमामि ललिताचरणारविंदं
भक्तेष्टदाननिरतं भवसिंधुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं
पद्मांकुशध्वजसुदर्शनलांछनाढ्यम् ॥ 3

प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यंतवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टविलयस्थितिहेतुभूतां
विद्येश्वरीं निगमवाङ्ममनसातिदूराम् ॥ 4

© 2022 Vedam Nadam

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशांभवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ 5

यः श्लोकपंचकमिदं ललितांबिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनंतकीर्तिम् ॥ 6

॥ इति श्रीमच्छंकरभगवतः कृतौ ललितापंचरत्नं संपूर्णम् ॥

© 2022 Vedam Nadam